## प्रतिष्कशश्च कशेः । (१५२/१०६६)

'कश गतिशासनयोः' (धा.पा. १०२५) इत्येतस्य धातोः प्रतिपूर्वस्य पचाद्यचि कृते [1]सुट् निपात्यते, तस्यैव षत्वम् । [2]ग्राममद्य प्रवेक्ष्यामि भव मे त्वं प्रतिष्कशः । [3]वार्तापुरुषः, सहायः, पुरोयायी वा प्रतिष्कशः [4]इत्यभिधीयते । कशेः [5]इति किम्? [6]प्रतिगतः कशां [7]प्रतिकशोऽश्वः । अत्र यद्यपि कशेरेव [8]कशाशब्दः, तथापि [9]कशेरिति धातोरुपादानं [10]तदुपसर्गस्य प्रतेः प्रतिपत्त्यर्थम् । तेन धात्वन्तरोपसर्गान्न भवति ॥

## प्रस्कण्वहरिश्चन्द्रावृषी । (१५३/१०६७)

प्रस्कण्व हरिश्चन्द्र [11]इति सुट् निपात्यते ऋषी चेदभिधेयौ भवतः । प्रस्कण्व ऋषिः । हरिश्चन्द्र ऋषिः । हरिश्चन्द्रग्रहणममन्त्रार्थम् । ऋषी इति किम् ? प्रकण्वो देशः । हरिचन्द्रो माणवकः ॥

## मस्करमस्करिणौ वेणुपरिव्राजकयोः । (१५४/१०६८)

मस्कर मस्करिन् इत्येतौ यथासङ्ख्यं वेणौ परिव्राजके च निपात्येते । मकरशब्दो ह्यव्युत्पन्नं प्रातिपादिकम्, तस्य वेणौ अभिधेये सुट् निपात्यते, परिव्राजके त्विनिः [12]अपि । मस्करः वेणुः । मस्करी परिव्राजकः । वेणुपरिव्राजकयोः इति किम् ? मकरो ग्राहः । मकरी समुद्रः ।

केचित् पुनरत्र माङि उपपदे करोतेः करणेऽच्प्रत्ययमपि निपातयन्ति, माङश्च ह्रस्वत्वम् सुट् च । मा क्रियते येन प्रतिषिध्यते स मस्करो वेणुः । वेणुग्रहणं च प्रदर्शनार्थम् अन्यत्रापि भवति, मस्करो दण्डः इति । परिव्राजके अपि माङि उपपदे करोतेस्ताच्छील्ये इनिर्निपात्यते, माङो ह्रस्वत्वं सुट् च तथैव । माकरणशीलो मस्करी कर्मापवादित्वात् परिव्राजक उच्यते । स [13]ह्येवमाह – मा कुरुत कर्माणि शान्तिर्वः श्रेयसी इति ॥

## कास्तीराजस्तुन्दे नगरे । (१५५/१०६९)

कास्तीर अजस्तुन्द इत्येतौ [14]शब्दौ निपात्येते नगरेऽभिधेये । ईषत्तीरमस्य, अजस्येव तुन्दमस्य इति व्युत्पत्तिरेव क्रियते, नगरं तु वाच्यमेतयोः । कास्तीरं नाम नगरम् । अजस्तुन्दं नाम नगरम् । नगरे इति किम्? कातीरम् । अजतुन्दम् ॥

## कारस्करो वृक्षः । (१५६/१०७०)

कारस्कर इति सुट् निपात्यते वृक्षश्चेद् [15]भवति । कारं करोति इति [16]दिवाविभानिशाप्रभाभास्करान्त (३.२.२१/२९३५) इति [16]टप्रत्ययः । कारस्करो वृक्षः । वृक्षः इति किम् ? कारकरः । केचिदिदं नाधीयते, पारस्करप्रभृतिष्वेव कारस्करो वृक्षः इति पठन्ति ॥

---

1. सुडागमः फ, विहिते सुडागमे ह. 2. ग्राममहम् फ. ह. 3. वार्ताहरः फ. 4. इत्युच्यते फ. 5. इति नास्ति क. 6. प्रगतः फ. 7. प्रकशः फ. 8. कशा फ.ह. 9. उपसर्गप्रसिद्ध्यर्थम् फ. 10. तदुपसर्गात् क.फ. 11. इत्येतौ ससुट्कौ निपात्येते ह. 12. इति फ.ह. 13. इत्याह फ.ह. 14. शब्दौ नास्ति क. 15. अभिधेयः इत्यधिकम् ह. 16. दिवाविभा नास्ति फ, विभा नास्ति ड. 17. ठञ् प्रत्ययः फ.